श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री दोड्डैयाचार् विरचितम्

# ॥ श्रीदेवराज पञ्चकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीदेवराज पञ्चकम् ॥

प्रत्यूषे वरदः प्रसन्नवदनः प्राप्ताभिमुख्यान् जनान्
आबद्धाञ्जलिमस्तकानविरलान् आबालमानन्दयन्।
मन्दोद्दामरचामरो मणिमयश्वेतातपत्रश्शनैः
अन्तर्गोपुरमाविरास भगवानारूढपक्षीश्वरः॥ १ ॥

मुक्तातपत्रयुगलोभयचामरान्तः
विद्योतमानविनतातनयाधिरूढम्।
भक्ताभयप्रदकराम्बुजमम्बुजाक्षं
नित्यं नमामि वरदं रमणीयवेषम्॥ २ ॥

यद्वेदमौलिगणवेद्यमवेद्यमन्यैः
यद्ब्रह्मरुद्रसुरनायकमौलिवन्द्यम्।
तत्पद्मनाभपदपद्मयुगं मनुष्यैः
सेव्यं भवद्भिरिति दर्शयतीव तार्क्ष्यः॥ ३ ॥

केचित्तत्वविशोधने पशुपतौ पारम्यमाहुः परे
व्याजह्रुः कमलासने नयविदोऽप्यन्ये हरौ सादरम्।
इत्येवं चलचेतसां तनुभृतां पादारविन्दं हरेः
तत्सन्दर्शयतीव संप्रति नृणां तार्क्ष्यः श्रुतीनां निधिः॥ ४ ॥

प्रत्यग्गोपुरसंमुखे दिनमुखे पक्षीन्द्रसंवाहितं
नृत्यच्चामरकोरकं निरुपमच्छत्रद्वयीभासुरम्।
सानन्दं द्विजमण्डलं विदधतं सन्नाहचिह्नारवैः
कान्तं पुण्यकृतो भजन्ति वरदं काञ्च्यां तृतीयोत्सवे॥ ५ ॥

॥ इति श्रीदेवराज पञ्चकम् सम्पूर्णम् ॥